# ॥ તુલસીસ્તવરાજઃ ॥

.. tulasIstavarAjaH ..

sanskritdocuments.org

June 13, 2017

# .. tulasIstavarAjaH ..

# ॥ તુલસીસ્તવરાજઃ ॥

## Sanskrit Document Information

Text title : tulasIstavarAjaH

File name : tulasIstavarAjaH.itx

Location : doc_devii

Language : Sanskrit

Subject : philosophy/hinduism/religion

Transliterated by : Shree Devi Kumar

Proofread by : Shree Devi Kumar

Source : Brahmapurana

Acknowledge-Permission: Mahaperiaval Trust

Latest update : June 12, 2017

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

June 13, 2017

*sanskritdocuments.org*

# ॥ તુલસીસ્તવરાજઃ ॥

શૌનકઃ –
સૂત સૂત મહાપ્રાજ્ઞ સર્વશાસ્ત્રવિશારદ ।
બ્રૂહિ મે સ્તવરાજં તુ તુલસ્યાઃ પુણ્યવર્ધનમ્ ॥ ૧॥

શ્રી સૂતઃ –
સાધુ સાધુ મહાભાગ કૃતઃ પ્રશ્નસ્ત્વયાऽનઘ ।
તુલસ્યાઃ સ્તવરાજં તુ કો નુ વર્ણયિતું ક્ષમઃ ॥ ૨॥

ઇહ લોકે પરત્રાપિ બ્રહ્મણાऽપિ ન શક્યતે ।
તુલસીકાનનં દૃષ્ટ્વા યત્ર કુત્રાપિ વૈ સ્થલે ॥ ૩॥

સ્મરણાત્કીર્તનાદ્ ધ્યાનાત્ સર્વપાપૈઃ પ્રમુચ્યતે ।
કિમુત સ્તવરાજેન સ્તુવતો મુક્તિરસ્ય વૈ ॥ ૪॥

ભવિશષ્યતીતિ સન્દેહો રૌરવં નરકં વ્રજેત્ ।
તુલસીસ્તવરાજસ્ય છન્દોऽનુષ્ટુપ્ પ્રકીર્તિતમ્ ।
ઋષિર્નારાયણો દેવો દેવતા શ્રીરુદીરિતા ॥ ૫॥

શ્રીરિતિ બીજં, તુમિતિ કીલકં, લમિતિ શક્તિઃ,
શ્રીમિતિ દિગ્બન્ધઃ । નમ ઇતિ સર્વભૂતોચ્ચાટનમ્ ॥

અઙ્ગન્યાસઃ -
ૐ શ્રી હૃદયાય નમઃ । ૐ તું શિરસે સ્વાહા ।
ૐ લં શિખાયૈ વષટ્ । ૐ સ્યૈં કવચાય હુમ્ ।
ૐ નં નેત્રત્રયાય વૌષટ્। ૐ મઃ અસ્ત્રાય ફટ્ ।
ભૂર્ભુવસ્સુવરોમિતિ દિગ્બન્ધઃ ॥

ધ્યાનં -
ચતુર્બાહુયુતાં દેવીં શઙ્ખપુસ્તકધારિણીમ્ ।
પદ્માક્ષમાલાં પુષ્પં ચ ધારિણીં પુણ્યદાયિનીમ્ ॥ ૬॥

અમૃતાબ્ધિસમુત્પન્ને સર્વશોકવિનાશિની ।
સર્વસૌભાગ્યદાત્રી(યી ) ત્વં તુલસિ (સી) રક્ષણં કુરુ ॥ ૭॥

દક્ષિણે લોકવિખ્યાતે વિષ્ણુધૃતશરીરિણિ ।

વિશ્વરૂપી વિશ્વકર્ત્રી તુલસી રક્ષણં કુરુ ॥ ૮॥

સર્વલોકમયે(યી ) પૂજ્યે સર્વસમ્પત્પ્રદાયિનિ ।
સર્વતાપપ્રશમનિ તુલસી રક્ષણં કુરુ ॥ ૯॥

મહિતા લોકપૂજ્યા ચ મહિષાસુરભઞ્જનિ ।
કરવીરપુરાવાસે તુલસી રક્ષણં કુરુ ॥ ૧૦॥

માયાવતી ભગવતી મહિલા ભદ્રકાલિકા ।
મોહિની સઙ્ગતા શૌરી તુલસી રક્ષણં કુરુ ॥ ૧૧॥

મહાલક્ષ્મિ મહાકાલી સર્વત્ર વિજયા જયા ।
અશરીરી શરીરી ચ તુલસી રક્ષણં કુરુ ॥ ૧૨॥

બ્રહ્માણી શઙ્કરી સૌમ્યા વૈષ્ણવી ચ સ્વધા તથા ।
દેવસેના મહારૌદ્રી તુલસી રક્ષણં કુરુ ॥ ૧૩॥

ચામુણ્ડા ચઞ્ચલા ભીમા રેણુકા મારિકા તથા ।
પદ્માક્ષી પદ્મમાલા ચ તુલસી રક્ષણં કુરુ ॥। ૧૪॥

શુભાશુભપ્રદાત્રી ત્વં વૃષભાસુરભઞ્જની ।
વઞ્જુલા જર્ઝરી ક્રૂરા તુલસી રક્ષણં કુરુ ॥ ૧૫॥

અતિગુહ્યતમં દિવ્યં પુત્રપૌત્રપ્રવર્ધનમ્ ।
નાસ્તિકાય પ્રદેયં ન નાભક્તાય કદાચન । ૧૬॥

શુશ્રૂષવે ચ ભક્તાય પ્રદેયં હિતમિચ્છતા ।
વિષ્ણુભક્તાય પૂજ્યાય વૈરાગ્ય ગુણશાલિને ॥ ૧૭॥

ભૃગુવારે ભૌમવારે પ્રદોષે ચ વિશેષતઃ ।
પ્રભાતે સર્વદા જપ્યં લિખિત્વા પુસ્તકં યદિ । ૧૮॥

સ્થાપિતં પૂજિતં ચેત્સ્યાત્ સર્વરોગૈઃ પ્રમુચ્યતે ।
મહાલક્ષ્મીઃ સિન્ધુતીરે વિષ્ણુના પ્રભવિષ્ણુના ॥ ૧૯॥

સાઽપિ વિધયે પ્રોક્તવતી તેનોક્તં નારદાય વૈ ।
નારદઃ પ્રોક્તવાન્મહ્યં તદેતત્પ્રોક્તવાનહમ્ ॥ ૨૦॥

એવં પરમ્પરાપ્રાપ્તં સર્વશાસ્રાર્થ સઙ્ગ્રહમ્ ।
તુલસીકવચં પુણ્યં તસ્માત્સ્તોત્રં મહાત્ફલમ્ ॥ ૨૧॥

તસ્માત્કોટિગુણં પુણ્યં તુલસીસ્તવરાજતઃ ।
પુત્રાર્થી પુત્રમાપ્નોતિ રાજ્યાર્થી રાજ્યમાપ્નુયાત્ ॥ ૨૨॥

કિં તેન બહુનોક્તેન મોક્ષાર્થી મોક્ષામાપ્નુયાત્ ।
સપ્તદ્વીપવતીં પૃથ્વીં દત્વા યત્ફલમાપ્નુયાત્ ।
તત્ફલં સમવાપ્નોતિ તુલસીપત્રદાનતઃ ॥ ૨૩॥

ઇતિ બ્રહ્મપુરાણાન્તર્ગતઃ તુલસીસ્તવરાજઃ સમ્પૂર્ણઃ ।

Encoded and proofread by Shree Devi Kumar

.. tulasIstavarAjaH ..
was typeset using XƎLATEX 0.99996
on June 13, 2017

Please send corrections to *sanskrit@cheerful.com*